# Shishu Anantadasah

# શિશુ-અનન્તદાસઃ

## Document Information

Text title : anantadAsaH

File name : anantadAsaH.itx

Category : misc, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : August 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

# Shishu Anantadasah

## શિશુ-અનન્તદાસઃ

લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

શિશુ-સંપ્રદાયસ્ય પ્રતિષ્ઠાતા શિશુ-અનન્તઃ "પઞ્ચસખા" ગોષ્ઠીષુ સર્વકનિષ્ઠત્વેન પરિગણિતઃ । અયં મહાત્મા ૧૪૮૬ ખ્રીષ્ટાબ્દે પુરી જિલ્લાયાઃ "બાલિપાટણા" નામકે સ્થાને એકસ્મિન્ કરણ પરિવારે અજાયત । કેચન અસ્ય જન્મસ્થાનં કૌણાર્કભૂમૌ અભવદિતિ કથયન્તિ, તન્મૃગ્યમ્ । અસ્ય પિતા કપિલ મહાન્તિઃ માતા ચ ગૌરી દેવી આસ્તામ્ । તદુક્તમ્ ઈશ્વરદાસેન ચૈતન્યભાગવતે-

"કપિલ મહાન્તિ તા નામ । તાહાર પુત્ર અનુપમ ॥

અનન્ત માહાન્તિ બોલાઇ । કોઠ કરણ હોઇથાઇ ॥ "

ભુવનેશ્વરસ્થિતઃ "ખણ્ડગિરિ" સ્થાનમસ્ય મહાત્મનઃ સાધનપીઠ આસીત્ । કિમ્બદન્તી આસીત્સઃ સૂર્યદેવાદેશેન પુરીં ગત્વા ચૈતન્યાત્ દીક્ષાં પ્રગૃહ્ય એકાક્ષર-સૂર્યમન્ત્રં પ્રાપ્તવાન્ । તસ્માત્ સહસ્રશ્લોકાનપિ પ્રાપ્તવાન્ ।

શિશુ અનન્તઃ પ્રખ્યાતો યોગી આસીત્ । યોગશક્ત્યા શિશુઃ ભૂત્વા સઃ દેવ્યાઃ મહાલક્ષ્મ્યાઃ કોલમણ્ડનં ચકાર । અનયા યોગવિભૂત્યા સન્તુષ્ટઃ સન્ સ્વયં દેવાધિદેવો જગન્નાથસ્તસ્મૈ શિશુ-ઉપાધિં દત્તવાન્ ઇતિ કર્ણાકર્ણિકયા શ્રુત્યા જ્ઞાયતે । અયં સમ્બાદઃ ઈશ્વરદાસકૃત-ચૈતન્યભાગવતાત્ પ્રમાણીક્રિયતે । યચ્ચોક્તમ્-

"શિશુ રૂપરે મોતે ભ્રમ । અનન્ત શિશુ તોર નામ ॥

પૃથિવી યેતે દિન થિવ । તો નામ વિખ્યાત હોઇવ ॥ " ઇતિ ।

અનન્તદાસસ્ય બહવો ગ્રન્થા આસન્ । તેષુ હેતુ ઉદય ભાગવતં, ચુમ્બક માલિકા, અણાકાર શવદ, ભવમુક્તિદાયક ગીતા, અર્થતારિણી, ભજનતત્ત્વમ્, મન્ત્રચન્દ્રિકા, ગરુડ-કેશવ સંમ્બાદઃ, પિણ્ડ-બ્રહ્માણ્ડ ગીતા, ઠિક બાખરઃ, ઉદે બાખરઃ, છાટ બાખરઃ, આગત ભવિષ્યઃ, પદ્મવન રાસઃ, ઠુલ શૂન્યરાસઃ, યન્ત્રટીકા, ધામછત્રમ્, વૈષ્ણવ પુરાણમ્, શિશુમન્ત્રવિચારાદયઃ પ્રસિદ્ધાઃ વર્તન્તે ।

અનન્તદાસસ્ય બહુ શિષ્યા આસન્ । શિશુ અર્જુન દાસઃ, શિશુ વનમાલિ દાસઃ, શિશુ શંકર દાસઃ, શિશુ પ્રતાપ રાયઃ એવં શિશુ દયાનિધિ દાસપ્રમુખાઃ મૂર્દ્ધન્યાઃ સન્તિ । એતે સર્વે શિશુ સંપ્રદાયેષુ અન્તર્ભુક્તા ભવન્તિ ।

"પઞ્ચસખા" ઇતિ કલ્પના ઓડિઆ સાહિત્યસ્ય બલિષ્ઠા પરંપરા । અયં વિશાલઃ ફલપુષ્પયુક્ત-પનસવૃક્ષરૂપેણ પરિગણિતઃ કદાચિત્ । વૃક્ષસ્યાત્મા સ્વયં જગન્નાથઃ । દ્રષ્ટા શ્રીચૈતન્યઃ । તથાહિ-

"જગન્નાથ દાસ શુણિલે । મઞ્જિરૂપી વૃક્ષ સ્થાપિલે ॥

પ્રભુંકુ કલે સુમરણ । બાલુત વૃક્ષ કલે પુણ ॥

બાલુત વૃક્ષકુ બલરામ । કલે યુવા ડાલ પત્રેણ ॥

મો આજ્ઞા પાઇ વૃક્ષ તોષ । વૌલે ફલિલા પણસ ॥

અચ્યુત આજ્ઞારે પણસ । વૃક્ષરે પાચિણ અવશ્ય ॥

આજ્ઞા પ્રમાણે વૃક્ષ પુણ । ભૂમિકુ ઓહલિ પડિણ ॥

પણસ તોલિ શિશુ નેઇ । ચૈતન્ય પારુશે દિઐ ॥

પક્વ પણસ ચૈતન । ભાંગિણ વાણ્ટિલે આપણ ॥ ” ઇતિ । ઇદં સુવાસિતં સુન્દરતમં મધુરફલં ષોડશશતાબ્ધ્યાઃ આરભ્ય અદ્યાવધિ સર્વત્ર સાદુ ભોજનરૂપેણ પ્રતિભાતિ ।

“હેતૂદય ભાગવતમ્” અનન્તદાસસ્ય કૃતિષુ અન્યતમમ્ । અસ્મિન્ ગ્રન્થે પિણ્ડ બ્રહ્માણ્ડતત્ત્વમ્, કાયા સાધનમ્, જગન્નાથસ્ય બુદ્ધરૂપ સ્વીકારઃ, શરીરે જગન્નાથસ્ય અવસ્થિતિઃ એવં રાધાકૃષ્ણયોઃ જીવાત્મ-પપરમાત્મ રૂપેણ વર્ણનં મિલતિ । યચ્ચોક્તં-

“શ્રીરાધાકૃષ્ણ વેનિ જન । જીવ પરમ રૂપે જાણ ॥ ” ઇતિ । અનયોઃ રાધાકૃષ્ણયોરવસ્થાનં ધવલાંગદ્વીપે વર્તતે । ગોપીભક્તેઃ નિદર્શન સ્વરૂપેણ કેવલં કામિની ભાવેન હિ કૃષ્ણપ્રાપ્તિર્જાયતે । અપિ ચ તત્ર- “કામિની ગણે આભાસૈ । પુરુષ લેશ તહિં નાંહિ ॥ ” ઇતિ પ્રેમભક્તેઃ પરાકાષ્ઠા વર્ણિતા । સૃષ્ટિપ્રક્રિયા ચાત્ર- આદૌ ઓંકારઃ । તસ્માદાકાશઃ । આકાશાત્ વિન્દુઃ । વિન્દોઃ મનઃ । મનસો માયા । માયાયાઃ સત્યમ્ । સત્યાત્ વિરાડ્ ઇતિ સમુત્પદ્યન્તે ।

હેતૂદય-ભાગવતે આદૌ ગુરુતત્ત્વં વર્ણિતમ્ । ગુરુઃ સર્વેષાં જીવાનાં સમુદ્ધરકર્તા । તં વિના મુક્તૌ નાધિકારો વર્તતે । શિષ્યસ્ય જિજ્ઞાસા બહુવિધા અસ્તિ । આદૌ શાસ્ત્ર શ્રવણમ્ । તત્તુ -
“યદિ શુણૈ મૂઢપણે । વધિર જન્મ અકારણે ।
યદિ શુણૈ મમતારે । અસુર જન્મ લભે નરે ।
યદિ શુણૈ અહં ગુણે । નર્ક ભોજન અનુદિને ।
યે શુણિ કરે ઉપહાસ । નર્કરે જન્મ તા અવશ્ય । ”
અપિ ચાત્ર-
“યેવણ જન એ દીક્ષાકુ । વિખ્યાતિ કહૈ આનકુ ।
એમન્તે સાત જન્મ ગલે । પુણિ જન્મૈ ભાટ ઘરે ।
ભાટ વનિતા પણે પુન । દિન વઞ્ચૈ અનુદિન ।
એહિ મતરે દિન જાઇ । જીવ ઉદ્ધરિ ન પારૈ ।
યેઉં ગુપત ગુરુવાણી । વિખ્યાત કલા મૂઢ પ્રાણી ।
તેણુ પાઇલા સેહુ ફલ । જન્મ લભિલા ભાટ કુલ ।

ગુરુ યે શિષ્યંક વિચાર । અન્ચકુ દિશે અન્ધકાર ॥ ” ઇતિ ગુરોઃ તત્ત્વશ્રવણવિધાનં વર્ણિતમ્ ।

“અસાધન-માર્ગઃ” અથવા અજપાજપવિધિઃ અનન્તદાસસ્ય મહતી સાધના વર્તતે । અવનાક્ષર-જપેન કોટિજન્મસ્ય પાપં વિધૌતિ ઇતિ તસ્ય નય આસીત્ । અયં માર્ગઃ ન કેનાપિ સાધનકોટિષુ અન્તર્ભુક્તઃ । તસ્માદસાધનમાર્ગત્વેન પરિગણિતઃ સ્વીકૃતશ્ચ । તથાહિ-
“દન્ત ઓષ્ટ ન હલિબ શિર કણ્ઠ ન કમ્પિબ ।

મન્ત્ર યન્ત્ર નાંહિ તંહિ દેખિવ બ્રહ્મસ્વરૂપ ॥ ” ઇતિ સમર્થયતિ દાદુ મહારાજઃ-
“નૈનવિન દેખિવા અંગવિન પેખિવા ।
રસનવિન વોલિબા બ્રહ્મ સેતી ।
શ્રવન્ વિન શુણિવા ચરણ વિન ચાલિવા

ચિત્ત વિન ચેતિવા સહજ એતિ । ” ઇતિ અતિન્દ્રિય માર્ગેણ બ્રહ્મસાક્ષાત્કારઃ સમ્ભવ ઇતિ નિષ્કર્ષઃ । તીર્થ્વ્રતાદિકમપિ ન સાધનમાર્ગે સહાયકા ભવન્તિ । શરીરમેવ સકલસાધન સ્થલમ્ । સુસ્થે શરીરે સકલાઃ સાધનાઃ સિધ્યન્તિ । તસ્માત્પિણ્ડબ્રહ્માણ્ડસાધનં સર્વશ્રેષ્ઠમ્ । યતો હિ -
“ન યા તીર્થ વ્રત કરિ । હૃદે જપ રામ હરિ ।

કહન્તિ અનન્ત શિશુ તરિવુ એ ભવકુ—- ॥ ” ઇતિ નામસ્મરણસ્ય સર્વિત્કૃષ્ટા સાધના ઉક્તા । રા મ અથવા હ રિ ઇતિ સંયુક્તાક્ષર-સ્મરણં નક્તન્દિવં કાર્યમ્ । તદ્વ્યતિરિક્તં દ્વિતીયો માર્ગો નાવશિષ્યતે । તથાહિ-
“એ વેનિ અક્ષર યેવે એકત્ર હોઇવ । હરિ વોલિ કરિ નામ હૃદરે બુણિવ ।

હરિ ઉદે હેઉછન્તિ ન જાણન્તિ કેહિ । કહન્તિ અનન્ત શિશુ હરીન્દ્રકુ ધ્યાયી ॥ ” ઇતિ સર્વં હરિમયં જગદિતિ સપ્રમાણં નિગદિતં તેન । સાધનસિદ્ધઃ અનન્તદાસસ્ય આસીત્ જગન્નાથે પ્રગાઢો વિશ્વાસઃ । પરમ-ભાગવતોત્તમસ્ય શ્રીહરેર્વિશુદ્ધભક્તિં પ્રાપ્તું તેન સર્વાદૌ ચેષ્ટિતઃ । સફલીકૃતશ્ચ । જય જગન્નાથ ।
સહાયક ગ્રન્થાઃ

૧- પઞ્ચસખા ઓડિઆ સાહિત્ય-અધ્યાપકઃ દેવેન્દ્ર મહાન્તિઃ
૨- સન્થ ભક્તિ સાહિત્ય-ચિત્તરંજન દાસઃ
૩- કૃષ્ણચન્દ્ર સાહુ રચનાસમ્ભાર ૫ ભાગ
૪- ઓડિઆ સ્નાતક પાઠ્યક્રમઃ- Odisha state open university, sambalpur
૫- ઓડિઆ સાહિત્યર ઇતિહાસ- ડૉ વંશીધર મહાન્તિઃ
૬- ઓડિઆ સાહિત્યર આદિપર્વ- સુરેન્દ્ર મહાન્તિઃ
૭- ઓડિઆ સાહિત્યર ઇતિહાસ- પં સૂર્યનારાયણ દાસઃ
૮- ઓડિઆ સાહિત્યર સાંસ્કૃતિક વિચારધારા- ચિત્તરંજન દાસઃ
૯- ઓડિશાર ધર્મધારારે પઞ્ચસખા પરિકલ્પના- ડૉ નટવર સામન્ત રાયઃ
૧૦- મહાપુરુષ પરિચય ઓ બાણી- નિમાંઇ ચરણ દાસઃ

૧૧- wikipidia org

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

---

*Shishu Anantadasah*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*